Shri Raghunatha Temple MSS. Library,
JAMMU

No. ५६६८ . च

Title श्री मद्यंत्रशोधन विधिः

Author +

Extent 2 Age +

Subject तन्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

5869

F — 2

नं० ५६६६-६-घ Complete

Sharma

श्रीमद्यंत्रशोपनविधिः (तन्त्रम्)

पत्र २ (द्वे) (सम्पूर्णम्)

नं० ~~१२०१~~ ५६६६-६-घ

© Dharmartha Trust J&K. Digitized by eGangotri

नं. ११०९ क
श्रीमद्यन्त्रशोधनविधि
२५ पत्रे

श्रीमद्यंत्रशोधनविधिः १६६

१६१

© Dharmartha Trust J&K. Digitized by eGangotri

यं॰ शो॰ वि॰

ॐनमस्त्रिपुरसुंदर्यैः अथयंत्रशोधनविधिः तत्रकृतनित्यक्रियः स्वस्तिवाचनपूर्वंसंकल्पंकुर्यात् अद्येत्यादिअमुकगोत्रःअमुकदेवशर्माअमुकदेवतायाः पूजार्थममुकयंत्रसंस्कारमहंकरिष्ये इतिसंकल्पन्यासंकुर्यात् अस्यश्रीयंत्रशोधनमंत्रस्यश्री सदाशिवऋषिः त्रिष्टुप्छंदः पराशक्तिर्देवता श्रींबीजं ह्रींशक्तिः क्लींकीलकं श्रीचक्रशुद्ध्यर्थेन्यासेविनियोगः इतिसकृत्वान्यासं कुर्यात् ततोमूलमंत्रऋष्यादिन्यासंचरेत् ततःषडंगः ततोमातृकान्यासः ततोर्धनारीश्वरन्यासः ततोलयांगन्यासः इतिन्यासान्-विधायपंचगव्यमानीय हौंइतिमंत्रेणाष्टोत्तरशतमभिमंत्र्य प्रणवेणतत्रयंत्रंक्षिपेत् ततउन्नोल्यपात्रांतरेस्थापयेत् ततःपंचामृत

© Dharmartha Trust J&K. Digitized by eGangotri

मानीय ह्रौमितिमंत्रेपूर्ववच्छोधयित्वास्नापयेत् तत्रक्रमः
प्रथमंक्षीरेणस्नापयेत् पुनर्जलेनस्नापयित्वाधूपंदद्यात् ए
वंदध्नाघृतेनमधुनाशर्करयाच ततोदुग्धेनशीतजलेनचंदने
नकस्तूरीकुंकुमेनचस्नापयित्वा ततोष्टभिःकलशैःकषायज
लसंपन्नैःकुंकुमगोरोचनचंदनमिश्रितैस्तोयैःस्नापयेत् स
र्वैषुपदार्थेषुमूलमंत्रेणस्नानंकारयेत् सुधामंत्रेणवा ततो
यंत्रमुत्तोल्य कुशाग्रेणतत्स्पृष्ट्वा ॐयंत्रराजायविद्महे महायं
त्रायधीमही तन्नोयंत्रःप्रचोदयात् इत्यष्टोत्तरशतमभिमंत्र्य
प्राणप्रतिष्ठांकुर्यात् ततोदेवतामावाह्य षोडशोपचारैःपंचोप
चारैःपूजयेद्वा ततःपट्टसूत्रादिकंदत्वा अष्टोत्तरशतंसहस्त्रंवाज

© Dharmartha Trust J&K. Digitized by eGangotri

त्वा शक्तश्चेद्बलिंदद्यात् ततोष्टोत्तरशतंहोमंकुर्यात् प्रत्याहु
तिसंपाताज्यंयंत्रेदद्यात् होमाभावेपिद्विगुणोजपः कार्यः ततोदक्षि
णांदत्त्वा ततोच्छिद्रावधारणंकुर्यात् ऐंसौःत्वचक्रेश्वरियंत्रंसौवर्णंशो
धयस्वाहेतिकनकयंत्रमंत्रः ॐॐचक्रेश्वरिराजतंयंत्रंशोधयशोध
यस्वाहा इतिराजतयंत्रमंत्रः ॐह्रींॐह्रींॐश्रींताम्रेश्वरियंत्रंशोधय
शोधयस्वाहा इतिताम्रयंत्रमंत्रः ॐश्रींक्लींॐस्फाटिकयंत्रंकुलां
बिकेशोधयशोधयस्वाहा इतिस्फाटिकयंत्रमंत्रः इतिश्रीमद्यंत्र
शोधनविधिः संपूर्णम् इतिभद्रंभवतुसदासाधकानाम् ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ५६६६ — घ

श्रीमद्यंत्रशोधन विधिः (तन्त्रम्)

पत्रे २ (द्वे)

© Dharmartha Trust J&K. Digitized by eGangotri